२४

346sk24

णिजन्तप्रकरणम्

प्रस्तावना

भवन्तः पूर्वं दशगणीयधातूनां विषये परिचयं प्राप्तवन्तः। इदानीं णिजन्तप्रकरणम् आरभ्यते। णिच् एकः प्रत्ययः। णिच् यस्य अन्ते भवति स शब्दः णिजन्त इत्युच्यते। णिच्प्रत्ययो द्विविधो भवति। तद्यथा चुरादिगणीयधातुभ्यः यः णिच्प्रत्ययो भवति स तु प्रकृतेरेव अर्थं परिपोषयति इति हेतोः स्वार्थिको भवति, अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति इति परिभाषाबलात् इत्येकम्। अपरं तावत् दशगणीयधातुभ्यः प्रेरणा (कराना) इत्यर्थेऽपि णिच् प्रत्ययो भवति। स एव अत्र आलोच्यविषयः। यथा हिन्दीभाषायां पढना – पढाना, लिखना– लिखाना, खाना– खिलाना, पीना–पिलाना इत्यादिप्रयोगा भवन्ति। एवं संस्कृतेऽपि यथा खादति–खादयति, लिखति–लेखयति, पिबति–पाययति इत्यादयः प्रयोगाः। अत्र दशगणीयधातुभ्यः णिच्प्रत्ययं कृत्वा प्रेरणावाचकः नूतनः धातुः निर्मीयते। यथा पठ्–धातोः अर्थः पढना (हिन्दी) इति, अस्मात् धातोः णिच्प्रत्यये कृते पाठि इति नूतनो धातुः भवति, तस्यार्थः पढाना (हिन्दी) इति। तथा च पाठयति इति रूपं भवति। णिचश्च (१.३.७४) इति योगेन कर्तृगामिनि क्रियाफले आत्मनेपदम्, अकर्त्रभिप्राये क्रियाफले तु शेषात् कर्तरि परस्मैपदम् (१.३.७८) इत्यनेन परस्मैपदं भवति इति णिजन्तधातोः उभयपदविधानं भवति इति साधारणनियमः। तेन पाठ्यते इति रूपमपि भवति। यद्यपि क्वचित् अकर्त्रभिप्राये क्रियाफलेऽपि आत्मनेपदं भवति यथा भीस्म्योर्हेतुभये (१.३.६८) इत्यत्र। पाठयति इत्यत्र मूलस्य पठ् इत्यस्य भूवादयो धातवः (१.३.१) इत्यनेन धातुसंज्ञा भवति, पाठि इति णिजन्तस्य तु सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति इति ज्ञेयम्। व्याकरणशास्त्रं ससोपानक्रमं पठनीयम्। तस्मादेव अस्य प्रकरणस्य कृते भ्वादिप्रकरणादिज्ञानमावश्यकम्। अतः प्राक्तनपाठानां ज्ञानं समासाद्य अग्रिमपाठाः पठनीयाः।

उद्देश्यानि

इमं पाठं पठित्वा भवताम् –

- णिच्प्रत्ययस्य कः अर्थः कथञ्च तस्य प्रयोगः इति ज्ञानं भविष्यति।
- णिच्प्रत्ययविधायकसूत्रार्थज्ञानं भविष्यति।
- णिच्प्रत्ययान्तरूपाणां प्रक्रियाज्ञानं भविष्यति।
- तत्तत्स्थलेषु विशेषसूत्राणां ज्ञानं भविष्यति।
- णिजन्तपदप्रयोगाय सामर्थ्यं स्यात्।

वाक्ये विविधानि कारकाणि भवन्ति। परन्तु यत् विना क्रियासिद्धिः नैव भवति तत् कर्तृकारकम् उच्यते इति भवन्तः कारकप्रकरणेषु अधीतवन्तः इति भावयामि। यथा रामः पठति इत्यत्र पठनक्रियासिद्धिः रामं विना नैव सम्भवति। क्रियायां कर्ता एव स्वतन्त्रतया विवक्षितो भवति। कर्मादि तु कर्त्रपेक्षितत्वात् स्वतन्त्रं भवितुं नार्हति। यथा क्रियया कर्तुः इष्टतमस्य कर्मसंज्ञा, क्रियायां कर्तुः प्रकृष्टोपकारकस्य करणसंज्ञा, दानादिक्रियया कर्तुः अभिप्रेतस्य सम्प्रदानसंज्ञा, कर्तुः अवधेः अपादानसंज्ञा, कर्तुः आधारस्य अधिकरणसंज्ञा भवति। तदेतत् सर्वं कारकं क्रियायां कर्त्रा विवक्षितं भवति। कर्ता तु न कस्यापि अधीनः। अतः स्वातन्त्र्येण विवक्षितस्य कारकस्य कर्तृसंज्ञा भवति, स्वतन्त्रः कर्ता इति योगेन। एतादृशस्यैव कर्तुः प्रेरकस्य कर्तृसंज्ञां हेतुसंज्ञां च विधातुम् अग्रिमसूत्रमारभ्यते-

[२४.१] तत्प्रयोजको हेतुश्च॥ (१.४.५५)

सूत्रार्थः – कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्।

सूत्रव्याख्या – संज्ञासूत्रमिदं पदत्रयात्मकम्। तत्प्रयोजकः (१/१), हेतुः (१/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। तत्पदेन स्वतन्त्रः कर्ता (१.४.५४) इति पूर्वसूत्रात् कर्तृपदं गृह्यते। तस्य = कर्तुः प्रयोजकः तत्प्रयोजकः इति षष्ठी तत्पुरुषसमासः। यः प्रेरयति स प्रयोजकः प्रेरकः प्रवर्तयिता वा इति कथ्यते। यश्च प्रेरितो भवति स प्रयोज्यः प्रेरितः प्रवर्तितो वा इत्युच्यते। यथा यज्ञदत्तो देवदत्तेन ओदनं पाचयति इत्यत्र पाकक्रियायां यज्ञदत्तेन देवदत्तः प्रेरितो भवति, अतः स प्रयोज्य इति कथ्यते, यज्ञदत्तस्तु प्रेरयति, अतः स प्रयोजक इत्युच्यते। अस्य प्रयोजकस्यैव कर्तृसंज्ञा हेतुसंज्ञा च अनेन सूत्रेण विधीयते। हेतुसंज्ञायाः फलं – हेतुमति च (३.१.२६) इति सूत्रेण प्रयोजकव्यापारे णिच्प्रत्ययसिद्धिः। कर्तृसंज्ञायाः फलं तु – लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण कर्तरि लडादिसिद्धिः। एवञ्च कर्तुः प्रयोजकस्य हेतुसंज्ञा कर्तृसंज्ञा च भवति इति सूत्रार्थः फलति।

अत्र विशेषः – णिजन्तस्थले प्रयोजककर्ता प्रयोज्यकर्ता च इति द्विविधः कर्ता भवति। व्यापारवान् कर्ता प्रयोज्यकर्ता भवति, प्रेरककर्ता च प्रयोजककर्ता भवति। देवदत्तः पचति, तं यज्ञदत्तः प्रेरयति– इत्यत्र पच्धातोः पाकानुकूलव्यापारः अर्थः, स च व्यापारः देववदत्तेऽस्ति। अतः देवदत्तः पाकानुकूलव्यापारवान्। अतः स कर्ता भवति किन्तु णिजन्तस्थले स प्रयोज्यकर्ता भवति। यतो हि अयं कर्ता प्रेरकेण प्रयोज्यो भवति। यज्ञदत्ते तु तादृशव्यापारो नास्ति अतः स कर्ता भवितुं नार्हति। तस्मात् तत्प्रयोजको हेतुश्च इत्यनेन यज्ञदत्तस्य हेतुसंज्ञया सह कर्तृसंज्ञापि विधीयते। अतः णिजन्तस्थले स कर्ता प्रयोजककर्ता इत्युच्यते। हेतुसंज्ञायाः फलं भियो हेतुभये षुक् इत्यादेः प्रवृत्तिः। कर्तृसंज्ञायाः फलं तु प्रयोजके वाच्ये सति लः कर्मणि च भावे चाकर्मकेभ्यः (३.४.६९)इत्यनेन कर्तरि लकारविधानम्।

अधुना हेतुसंज्ञायाः फलं प्रदर्श्यते–

[२४.२] हेतुमति च (३.१.२६)

सूत्रार्थः – प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकं वर्तते। हेतुमति (७/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। हेतुः (प्रयोजकः) आधारतया अस्य अस्ति इति मतुप्प्रत्यये हेतुमान्, तस्मिन् हेतुमति। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (३.१.२२) इत्यतः धातोः, सत्याप–पाश–रूप–वीणा–तूल–श्लोक–सेना–लोम–त्वच–वर्म–वर्ण–चूर्ण–चुरादिभ्यो णिच् (३.१.२५) इत्यतः णिच् इति पदमनुवर्तते। प्रत्ययः परश्च इत्युभयमधिकृतम्। हेतुमत्–शब्देन हेतोः (प्रयोजकस्य) व्यापारः अभिप्रेतोऽस्ति। स च व्यापारः प्रेरणादिः। एवञ्च प्रयोजककर्तुः प्रेरणादिव्यापारे वाच्ये सति धातोः णिच्प्रत्ययो भवति इति सूत्रार्थः सम्पद्यते। णिचः णकारचकारौ इतौ स्तः। अतः इकारमात्रं शिष्यते। सूत्रेणानेन णिच्प्रत्ययो विधीयते।

अत्र विशेषः – वस्तुतः भ्वादितः चुराद्यन्तं यावत् ये दशगणीया धातवो वर्तन्ते, तेभ्यः णिजन्तधातुः पृथक् नास्ति, अपि तु तेभ्यः णिच्प्रत्यये कृते सति ते नूतनरूपतां लभन्ते, तस्मात् ते एव णिजन्ताः इत्युच्यते। णिजन्तधातोः णिचश्च (१.३.७४) इत्यनेन उभयपदविधानं भवति इति ध्येयम्।

उदाहरणम् – भावयति ।

सूत्रार्थसमन्वयः – भवन्तं प्रेरयति इत्यर्थे भूधातोः णिचि अनुबन्धलोपे भू इ इति जाते णिचः णित्त्वात् अचो ञ्णिति (७.२.११५) इत्यनेन अजन्तलक्षणावृद्धौ औकारे एचोऽयवायावः (६.१.७८) इत्यनेन आवादेशे वर्णसम्मेलने च भावि इति जायते। तस्य च समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां कर्तृत्वविवक्षायां च वर्तमाने लट् (३.२.१२३) इति योगेन लटि भावि ल् इति स्थितिः उत्पन्ना। ततः प्रथमपुरुषैकवचनविवक्षायां णिचश्च (१.३.७४) इति सूत्रेण परस्मैपदात्मनेपदयोः युगपत् प्राप्तयोः क्रियाफलस्य परगामित्वे शेषात् कर्तरि परस्मैपदम् (१.३.७८) इत्यनेन परस्मैपदविधानात् तिप्तस्झिसिप्थस्थमिब्वस्मस्–तातांझथासाथांध्वमिड्वहिमहिङ् (३.४.७८) इति योगेन लस्य स्थाने परस्मैपदसंज्ञकेषु तिबादिषु नवसु प्रत्ययेषु प्राप्तेषु प्रथमपुरुषैकवचनविवक्षायां तिपि अनुबन्धलोपे भावि ति इति जाते कर्तरि शप् (३.१.६८) इत्यनेन शपि अनुबन्धलोपे भावि अ ति इति जाते शपः शित्त्वात् तिङ्शित्सार्वधातुकम् (३.४.११३) इत्यनेन सार्वधातुकसंज्ञायां सार्वधातुकार्धधातुकयोः (७.४.८४) इत्यनेन इगन्ताङ्गस्य भावि इत्यस्य इकारस्य गुणे एकारे एचोऽयवायावः (६.१.७८) इत्यनेन एकारस्य स्थाने अयादेशे भाव् अय् अ ति इति जाते भावयति इति रूपं सिध्यति। कर्तृगामिनि क्रियाफले तु आत्मनेपदप्रत्ययः। तेन भावयते इत्यपि रूपं भवति इति णिजन्तस्थले द्विविधं रूपं भवति इति सम्यक् अवधार्यताम्।

अधुना भवतां सुबोधाय भूधातोः प्रत्येकं लकारेषु एकैकम् उदाहरणम् अधः प्रदर्श्यन्ते–

लिटि – भावयाञ्चकार–भावयाञ्चक्रे। भावयामास। भावयाम्बभूव।

लुटि – (परस्मै) भावयिता, भावयितारौ, भावयितारः। **भावयितासि**।

(आत्मने.) भावयिता, भावयितारौ, भावयितारः। **भावयितासे**।

लृटि – (परस्मै.) भावयिष्यति। (आत्मने.) भावयिष्यते।

लोटि – (परस्मै.) भावयतु–भावयतात्। (आत्मने.) भावयताम्।

लङि – (परस्मै.) अभावयत्। (आत्मने.) अभावयत।

विधिलिङि – (परस्मै.) भावयेत्। (आत्मने.) भावयेत।

आशीर्लिङि – (परस्मै.) भाव्यात्। (आत्मने.) भावयिषीष्ट।

भूधातोः णिचि लुङि अडागमे तिपि इतश्च (३.४.१००) इत्यनेन तिपः इकारस्य लोपे च्लौ अ भू इ च्लि त् इति जायते। ततः च्लेः स्थाने सिजादेशे प्राप्ते तं बाधित्वा णिश्रिद्रुस्रुभ्यः कर्तरि चङ् (३.१.४८) इत्यनेन ण्यन्तधातुत्वात् च्लेः स्थाने चङ्–आदेशे अनुबन्धलोपे अभू इ अ त् इति जाते **णिच्यच आदेशो न द्वित्वे कर्तव्ये** इति परिभाषया चङि (६.१.११) इत्यनेन भू इत्यस्य द्वित्वे पूर्वोऽभ्यासः (६.१.४) इत्यनेन च पूर्वभागस्य अभ्याससंज्ञायां ह्रस्वः (७.४.५९) इत्यनेन आद्यस्य भू इत्यस्य ऊकारस्य ह्रस्वे अभ्यासे चर्च (८.४.५४) इत्यनेन जश्त्वे अ बु भू इ अत् इति जायते। ततः द्वितीयस्य भू इत्यस्य ऊकारस्य अचो ञ्णिति (७.२.११५) इति योगेन वृद्धौ भौ इति जाते एचोऽयवायावः (६.१.७८) इत्यनेन आवादेशे अ बु भाव् इ अ त् इति जायते। ततः णौ चङ्युपधाया ह्रस्वः (७.४.१) इत्यनेन भाव् इत्यस्य उपधाभूतस्य आकारस्य ह्रस्वे अ बु भव् इ अ त् इति जाते णेरनिटि (६.४.५१) इत्यनेन णिचः इकारस्य लोपे अ बु भव् अ त् इति जाते सन्वल्लघुनि चङ्परेऽनग्लोपे (७.४.९३) इत्यनेन सन्वद्भावे अग्रिमसूत्रमारभ्यते –

[२४.३] ओः पुयण्ज्यपरे॥ (३.४.८०)

सूत्रार्थः – सनि परे यदङ्गं तदवयवाभ्यासस्योकारस्य इत् स्यात् पवर्ग–यण्–जकारेषु अवर्णपरेषु परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। ओः (६/१), पुयण्जि (७/१), अपरे (७/१) इति सूत्रगतपदच्छेदः। पुश्च (पवर्गश्च) यण् च ज् च पुयण्ज् इति समाहारद्वन्द्वः, तस्मिन् पुयण्जि। अः (अकारः) परो यस्मात् स अपरः इति बहुव्रीहिः, तस्मिन् अपरे। अत्र लोपोऽभ्यासस्य (७.४.५८) इत्यतः अभ्यासस्य इति पदस्य, भृञामित् (७.४.७६) इत्यतः इत् इति पदस्य, सन्यतः (७.४.७९) इत्यतः सनि इति पदस्य च अनुवृत्तिर्भवति। अङ्गस्य (६.४.१) इत्यधिक्रियते। अङ्गस्य इति अवयवषष्ठी। पुयण्जि इति विशेष्यस्य अपरे इति विशेषणम्। उकारस्य षष्ठ्यन्तं रूपं भवति ओः इति। इत् इत्यस्य अर्थः ह्रस्वः इकारः। तथा च सनि परतः यदङ्गं भवति तस्य अवयवस्य अभ्यासस्य उकारस्य स्थाने इकारादेशः स्यात् पवर्गयण्जकारेषु अवर्णपरेषु परतः। सूत्रेणानेन इत्त्वं विधीयते।

उदाहरणम् – अबीभवत्।

सूत्रार्थसमन्वयः – तथा च अ बु भव् अ त् इति जाते ओः पुयण्ज्यपरे इति प्रकृतसूत्रेण बु इत्यस्य उकारस्य इत्त्वं भवति। यतो हि अत्र अभ्यासस्थः उकारोऽस्ति। किञ्च भकारः पवर्गीयवर्णः अकारपरकश्चास्ति। अपि च अत्र अङ्गं सन्परकमपि अस्ति। ततः दीर्घो लघोः (७.४.९४) इत्यनेन बेः इकारस्य दीर्घे सर्ववर्णसम्मेलने च अबीभवत् इति रूपं सिध्यति।

सूत्रस्यास्य अन्यानि उदाहरणानि ग्रन्थान्तरे द्रष्टव्यानि।

पाठगतप्रश्नाः-१

१. कर्तुः प्रयोजकस्य कर्तुसंज्ञा भवति किम्।

२. हेतुसंज्ञा कस्य भवति।

३. णिच्प्रत्ययः कस्मिन्नर्थे भवति।

४. स्वार्थे णिच्प्रत्ययो भवति किम्।

५. हेतुमति च (३.१.२६) इति सूत्रे हेतुमत्-शब्देन किं विवक्षितम्।

६. णिचश्च (१.३.७४) इति योगेन किं भवति।

७. ओः पुयण्ज्यपरे इति योगस्य कोऽर्थः।

८. ओः पुयण्ज्यपरे इति सूत्रस्य किम् उदाहरणम्।

तिष्ठन्तं प्रेरयति इति विग्रहे ष्ठा गतिनिवृत्तौ इति धातोः णिचि स्था + इ इति स्थिते सूत्रमिदमारभ्यते –

[२४.४] अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ॥ (७.३.३६)

सूत्रार्थः – ऋ, ह्री, व्ली, री, क्नूयी, क्ष्मायी इत्येतेभ्यो धातुभ्यः आकारन्तधातुभ्यश्च पुगागमो भवति णिचि परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकम्। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्याताम् (६/३), पुक् (१/१), णौ (७/१) इति सूत्रगतपदच्छेदः। अर्तिश्च ह्रीश्च व्लीश्च रीश्च क्नूयीश्च क्ष्मायीश्च आच्च तेषामितरेतरयोगद्वन्द्वे अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातः, तेषाम् अर्तिह्रीव्लीरीक्नूयीक्ष्माय्याताम्। पुकः ककार इत्संज्ञकः उकारश्च उच्चारणार्थकः, अतः प्-मात्रमवशिष्यते। कित्वात् आद्यन्तौ टकितौ (१.१.४६) इति परिभाषया पुक् अन्त्यावयवो भवति। अङ्गस्य (६.४.१) इत्यधिक्रियते। एवञ्च सूत्रार्थस्तावत्– ऋ, ह्री, व्ली, री, क्नूयी, क्ष्मायी इत्येतेभ्यो धातुभ्यः आकारन्तधातुभ्यश्च पुगागमो भवति णिच्प्रत्यये परतः। तथा च सूत्रेणानेन पुक्-आगमो विधीयते।

उदाहरणम् – स्थापयति।

सूत्रार्थसमन्वयः – तथा च स्थाधातोः णिचि स्था इ इति जाते प्रकृतसूत्रेण पुगागमो भवति। यतो हि स्थाधातुः आकारान्तधातुः अस्ति किञ्च ततः णिच्प्रत्ययोऽपि विहितोऽस्ति। ततः पुकः अनुबन्धलोपे स्थापि इति जाते सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि गुणे एकारे अयादेशे स्थापयति इति रूपं सिध्यति, पक्षे स्थापयते इत्यपि भवति। अन्यानि उदाहरणानि–

१. ऋ गतौ-अर्पयति, अर्पयते।

२. ह्री लज्जायाम्–ह्रेपयति, ह्रेपयते।

३. व्ली वरणे–व्लेपयति, व्लेपयते।

४. री गतिरेषणयोः–रेपयति, रेपयते।

५. क्नुयी शब्दे उन्दने च–क्नोपयति, क्नोपयते।

६. क्ष्मायी विधूनने–क्ष्मापयति, क्ष्मापयते।

अधः स्थाधातोः सर्वेषु लकारेषु उदाहरणानि प्रदर्श्यन्ते–

लिटि – स्थापयाञ्चकार–स्थापयाञ्चक्रे। स्थापयामास। स्थापयाम्बभूव।

लुटि – (परस्मै) स्थापयिता, स्थापयितारौ, स्थापयितारः। **स्थापयितासि**।

(आत्मने.) स्थापयिता, स्थापयितारौ, स्थापयितारः। **स्थापयितासे**।

लृटि – (परस्मै.) स्थापयिष्यति। (आत्मने.) स्थापयिष्यते।

लोटि – (परस्मै.) स्थापयतु–स्थापयतात्। (आत्मने.) स्थापयताम्।

लङि – (परस्मै.) अस्थापयत्। (आत्मने.) अस्थापयत।

विधिलिङि – (परस्मै.) स्थापयेत्। (आत्मने.) स्थापयेत।

आशीर्लिङि – (परस्मै.) स्थाप्यात्। (आत्मने.) स्थापयिषीष्ट।

लृङि – (परस्मै.) अस्थापयिष्यत्। (आत्मने.) अस्थापयिष्यत।

स्था–धातोः लुङि णिचि पुगागमे लुङि प्रथमपुरुषैकवचने तिपि च्लौ चङि णिलोपे अ स्थाप् अ त् इति स्थिते विशेषं दर्शयितुं सूत्रमिदमारभ्यते –

[२४.५] तिष्ठतेरित्॥ (७.४.५)

सूत्रार्थः – उपधाया इदादेशः स्याच्चङ्परे णौ।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। तिष्ठतेः (६/१), इत् (१/१) इति सूत्रगतपदच्छेदः। णौ चङ्युपधाया ह्रस्वः (७.४.५९) इत्यतः णौ, चङि, उपधायाः इत्येतेषां पदानाम् अनुवृत्तिर्भवति। तेन चङ्परके णिच्प्रत्यये परतः स्थाधातोः उपधायाः इकारादेशो भवति इति सूत्रार्थः सिध्यति।

उदाहरणम् – अतिष्ठिपत् ।

सूत्रार्थसमन्वयः – तथा च अ स्थाप् अ त् इति स्थिते स्थाप् इत्यत्र उपधाभूतस्य आकारस्य स्थाने इकारादेशे अ स्थिप् अ त् इति जायते। ततः चङि (६.१.११) इत्यनेन स्थिपः द्वित्वे हलादिः शेषः (७.४.६०) इत्यस्य बाधकेन शर्पूर्वाः खयः (७.४.६१) इत्यनेन थकारशेषे चर्त्वे च अ ति स्थिप् अ त् इति जाते आदेशप्रत्यययोः (८.३.५९) इत्यनेन सकारस्य षकारे अतिष्ठिपत् इति रूपं सिध्यति।

ज्ञानार्थकात् ज्ञापनार्थकात् च चुरादिगणीयात् ज्ञप्–धातोः कर्तृत्वविवक्षायां सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् इति स्वार्थिकणिचि, पुनश्च हेतमण्णिचि ज्ञप् इ इ इति जायते। ततः णेरनिटि (६.४.५१) इति स्वार्थकणिचः लोपे उपधावृद्धौ च ज्ञाप् इ इति जायते। तत्र ज्ञप मिच्च इति निर्देशात् ज्ञप्–धातोः मित्त्वम् अतिदिश्यते। तेन ज्ञप्–धातुः मित् भवति। अधुना मित्करणफलं प्रदर्शयितुम् अग्रिमसूत्रमारभ्यते –

[२४.६] मितां ह्रस्वः॥ (६.४.९२)

सूत्रार्थः – घटादीनां ज्ञपादीनां चोपधायाः ह्रस्वः स्याण्णौ।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। मिताम् (६/३), ह्रस्वः (१/१) इति सूत्रगतपदच्छेदः। ऊदुपधाया गोहः (६.४.८९), इत्यतः उपधायाः इति पदस्य, दोषो णौ (६.४.९०) इत्यतः णौ इति पदस्य च अनुवृत्तिर्भवति। तत्र ये मितः सन्ति ते धातुपाठे परिगणिताः सन्ति। ज्ञपादयो घटादयश्च मितो भवन्ति इति धातुपाठे दृश्यते। तत्र मित्त्वम् अतिदिश्यते इति अवधार्यताम्, न तु मकारः इत् यस्य धातोः स धातुः मित् इति ग्राह्यम्। यथा घट चेष्टायाम् इति धातौ घटादयो मितः इत्यनेन मित्त्वमतिदिश्यते। किञ्च ज्ञप मिच्च इति कथनेन ज्ञप्धातौ मित्त्वमतिदिश्यते। मित्त्वस्य फलं तु मितां ह्रस्वः (६.४.९२) इत्येकम्। अपरं तु चिण्णमुलोर्दीर्घोऽन्यतरस्याम् (६.४.९३) इत्यनेन विकल्पेन दीर्घादेशविधानं अघटि–अघाटि इत्यादौ।

उदाहरणम् – घटयति। ज्ञपयति।

सूत्रार्थसमन्वयः - एवञ्च ज्ञाप् इ इति जाते कित्त्वातिदेशे प्रकृतसूत्रेण ह्रस्वादेशे ज्ञपि इति जायते। ततः ज्ञपि इति समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि गुणे अयादेशे ज्ञपयति इति रूपं भवति। लुङि तु च्लेः चङि द्वित्वे णिलोपे सन्वद्भावे सन्यतः इति इत्वे अजिज्ञपत् इति रूपं भवति।

एवमेव घटयति इत्यत्रापि ज्ञेयम्। लुङि तु दीर्घो लघोः (७.४.९४) इत्यस्य प्रवृत्तिः। तेन अजीघटत्, अजीघटत इति सिध्यति।

अधः ज्ञप्–धातोः सर्वेषु लकारेषु उदाहरणानि प्रदर्श्यन्ते–

लिटि – ज्ञपयाञ्चकार–ज्ञपयाञ्चक्रे। ज्ञपयामास। ज्ञपयाम्बभूव।

लुटि – (परस्मै) ज्ञपयिता, ज्ञपयितारौ, ज्ञपयितारः। **ज्ञपयितासि**।

(आत्मने.) ज्ञपयिता, ज्ञपयितारौ, ज्ञपयितारः। **ज्ञपयितासे**।

लृटि – (परस्मै.) ज्ञपयिष्यति। (आत्मने.) ज्ञपयिष्यते।

लोटि – (परस्मै.) ज्ञपयतु–ज्ञपयतात्। (आत्मने.) ज्ञपयताम्।

लङि – (परस्मै.) अज्ञपयत्। (आत्मने.) अज्ञपयत।

विधिलिङि – (परस्मै.) ज्ञपयेत्। (आत्मने.) ज्ञपयेत।

आशीर्लिङि – (परस्मै.) ज्ञप्यात्। (आत्मने.) ज्ञपयिषीष्ट।

लृङि – (परस्मै.) अज्ञपयिष्यत्। (आत्मने.) अज्ञपयिष्यत।

लुङि – (परस्मै.) अजिज्ञपत्, (आत्मने.) अजिज्ञपत।

पाठगतप्रश्नाः-२

९. तिष्ठतेरित् इति सूत्रस्य कोऽर्थः।

१०. अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति सूत्रेण किं विधीयते।

११.घटयति इत्यत्र उपधाह्रस्वः केन विधीयते।

१२.मितां ह्रस्वः इत्यस्य कोऽर्थः।

१३.ज्ञप्–धातोः मित्त्वं कथं भवति।

टु ओ श्वि गतिवृद्ध्योः धातोः णिचि लुङि प्रथमपुरुषैकवचने तिपि चङि अडागमे अश्वि इ अ त् इति जाते सूत्रमिदमारभ्यते–

[२४.७] णौ च संश्चङोः॥ (६.१.३१)

सूत्रार्थः – सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात्।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। णौ (७/१) च (अव्ययम्) संश्चङोः (७/२) इति सूत्रगतपदच्छेदः। सन् च चङ् च संश्चङौ तयोः संश्चङोः इति इतरेतरयोगद्वन्द्वः। विभाषा श्वेः (६.१.३०) इति सूत्रस्य, ष्यङः सम्प्रसारणम् (६.१.१३) इत्यतश्च सम्प्रसारणम् इति पदस्य च अनुवृत्तिर्भवति। संश्चङोः णौ इत्यस्य विशेषणमस्ति। एवञ्च सन्परकः चङ्परकः च णिच् इत्यर्थः। ततः सन्परके णौ अथवा चङ्परके णौ श्विधातोः विकल्पेन सम्प्रसारणं भवति इति सूत्रार्थः। सूत्रेणानेन वैकल्पिकं सम्प्रसारणं विधीयते। श्विधातोः वकारः सम्प्रसारणी अस्ति, तस्य सम्प्रसारणे उकारो भवति, ततः सम्प्रसारणाच्च (६.१.१०८) इत्यनेन पूर्वरूपैकादेशे शु इति जायते इति ध्येयम्।

उदाहरणम् – अशूशवत् ।

सूत्रार्थसमन्वयः – एवञ्च अ श्वि इ अ त् इत्यवस्थायां वृद्धिसम्प्रसारणयोः युगपत् प्राप्तयोः **सम्प्रसारणं तदाश्रयं च कार्यं बलवत्** इति परिभाषया आदावेव सम्प्रसारणं भवति, अतः णौ च संश्चङोः इत्यनेन विकल्पेन सम्प्रसारणे उकारे अ शु इ इ अ त् इति जाते सम्प्रसारणाच्च (६.१.१०८) इत्यनेन पूर्वरूपैकादेशे अ शु इ अ त् इति जाते शु इत्यस्य चङि (६.१.११) इत्यनेन द्वित्वे दीर्घो लघोः (७.४.९४) इत्यनेन अभ्यासस्य दीर्घे अ शू शु इ अ त् इति जाते द्वितीयशोः उकारस्य अचो ञ्णिति (७.२.११५) इत्यनेन वृद्धौ एचोऽयवायावः (६.१.७८) इत्यनेन औकारस्य आवादेशे अ शू शाव् इ अ त्

इति जाते णौ चङ्युपधाया ह्रस्वः (७.४.१) इत्यनेन उपधाह्रस्वे, णेरनिटि (६.४.५१) इत्यनेन णिलोपे सर्ववर्णसम्मेलने च अशूशवत् इति रूपं सिध्यति।

दिवादिगणीयस्य शो तनूकरणे इति धातोः श्यन्तं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इत्यनेन णिचि धातोः उकारस्य स्थाने आदेच उपदेशेऽशिति (६.१.४५) इत्यनेन आकारादेशे शा इ इति जाते अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इत्यनेन पुगागमे प्राप्ते सूत्रमिदमारभ्यते –

[२४.८] शाच्छासाह्वाव्यावेपां युक्॥ (७.३.३७)

सूत्रार्थः – प्राप्तात्त्वानां शो–छो–षो–ह्वे–व्ये इत्येतेषां धातूनां किञ्च वेपाधात्वोः युगागमो भवति णिचि परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। शाच्छासाह्वाव्यावेपाम् (६/३), युक् (१/१) इति सूत्रगतपदच्छेदः। शाश्च छाश्च साश्च ह्वाश्च व्याश्च वेश्च पाश्च तेषामितरेतिरयोगद्वन्द्वे शाच्छासाह्वाव्यावेपाः, तेषाम् शाच्छासाह्वाव्यावेपाम्। युकः ककारः इत् अस्ति। अतः य्–इत्येव शिष्यते। कित्त्वात् आद्यन्तौ टकितौ (१.१.४६) इति परिभाषया अन्त्यावयवो भवति इति स्मर्तव्यम्। तथा च सूत्रेणानेन युक्–आगमो विधीयते। सूत्रमिदम् अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इत्यस्यापवादभूतम्।

उदाहरणम् – शाययति , शाययते।

सूत्रार्थसमन्वयः – एवञ्च शा इ इत्यवस्थायां प्रकृतसूत्रेण युकि अनुबन्धलोपे शाय् इ इति जाते समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि गुणे एकारे अयादेशे शाययति, तप्रत्यये तु शाययते इति रूपद्वयं भवति।

भ्वादिगणायात् ओदितः ओ वै शोषणे इति धातोः वायन्तं प्रेरयति इत्यर्थे णिचि आदेच उपदेशेऽशिति (६.१.४५) इति सूत्रेण आत्त्वे वा इ इति स्थिते अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुगागमे प्राप्ते सूत्रमिदमारभ्यते–

[२४.९] वो विधूनने जुक्॥ (७.३.३८)

सूत्रार्थः– वातेर्जुक् स्यात् णौ कम्पेऽर्थे।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। वः (६/१), विधूनने (७/१), जुक् (१/१) इति सूत्रगतपदच्छेदः। सूत्रेऽस्मिन् अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगात् णौ इति पदस्यानुवृत्तिर्भवति। औ वै शोषणे इति धातोः ऐकारस्य आत्त्वे वा इति जाते तस्य षष्ठ्येकवचनान्तं रूपं वः इति। जुकः ककारः इत्संज्ञकः उकारश्च उच्चारणार्थः तस्मात् ज्–मात्रं शिष्यते। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगस्य अपवादभूतोऽयं योगः। विधूननं कम्पः। एवञ्च कम्पार्थे वैधातोः जुगागमो भवति णिच्प्रत्यये परतः इति सूत्रार्थः फलति। सूत्रेणानेन जुगागमो विधीयते।

उदाहरणम् – वाजयति, वाजयते ।

सूत्रार्थसमन्वयः – एवञ्च वायन्तं प्रेरयति इत्यर्थे वैधातोः ऐकारस्य आत्त्वे प्राप्तं पुगागमं बाधित्वा वो विधूनने जुक इति सूत्रेण जुगागमे अनुबन्धलोपे च वा ज् इ इति जाते प्रथमपुरुषैकवचनविवक्षायां तिपि शपि गुणे एकारे अयादेशे वाजयति इति रूपं सिध्यति, पक्षे वाजयते इत्यपि।

ण्यन्तस्थले कर्त्रभिप्राये क्रियाफले णिचश्च (१.३.७४) इत्यनेन आत्मनेपदं सिद्धमस्ति । किन्तु शेषात् कर्तरि परस्मैपदम् (१.३.७८) इत्यनेन अकर्त्रभिप्राये क्रियाफले परस्मैपदे प्राप्ते तत्रापि आत्मनेपदं भवतु इत्येतदर्थमयं योगः आरभ्यते–

[२४.१०] लियः सम्माननशालीनीकरणयोश्च॥ (१.३.७०)

सूत्रार्थः– लीङ्लियोः ण्यन्तयोः आत्मनेपदं स्यात् अकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे।

सूत्रव्याख्या –विधिसूत्रेऽस्मिन् पदत्रयमस्ति। लियः (५/१), सम्माननशालीनकरणयोः (७/२), च (अव्ययम्) इति सूत्रगतपदच्छेदः। सम्माननं च शालीनीकरणं च सम्माननशालीनीकरणे इति इतरेतरयोगद्वन्द्वः, तयोः सम्माननशालीनीकरणयोः। अनुदात्तङित आत्मनेपदम् (१.३.१२) इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति, णेरणौ यत्कर्म णौ चेत् स कर्ताना‌ध्याने (१.३.६७) इत्यतः णौ इत्यस्य चानुवृत्तिर्भवति। किञ्च चकारेण गृधिवञ्च्योः प्रलम्भने (१.३.६९) इत्यतः प्रलम्भने इत्यस्यानुकर्षणं भवति, लियः इत्यनेन लीलिङ्धात्वोः ग्रहणं भवति। अत्र सम्माननम् पूजा, शालीनीकरणम् अभिभवः, प्रलम्भनं वञ्चनम्। एवञ्च पूजाभिभववञ्चनार्थेषु ण्यन्तस्य लियः आत्मनेपदं स्यात् अकर्तृगेऽपि फले । तथा च सूत्रेणानेन आत्मनेपदं विधीयते।

उदाहरणम् – जटाभिः लापयते ।

सूत्रार्थसमन्वयः – प्रलम्भनाभिभवपूजासु लियो नित्यमात्त्वमशिति वाच्यम् इति वार्तिकेन लीधातोः पूजार्थे नित्यम् आत्त्वे णिचि परे च पुगागमे, लापि इत्यवस्थायां णिचश्च (१.३.७४) इत्यनेन उभयपदे प्राप्ते तं बाधित्वा लियः सम्माननशालीनीकरणयोश्च इति योगेन केवले आत्मनेपदे प्रथमपुरुषैकवचनविवक्षायां लटि तप्रत्यये शपि गुणे एकारे अयादेशे लापयते इति रूपं सिध्यति । जटाभिः लापयते – पूजाम् अधिगच्छति इत्यर्थः।

अभिभवार्थे– श्येनो वर्तिकाम् उल्लापयते, अभिभवतीत्यर्थः।

प्रलम्भनार्थे– बालम् उल्लापयते, वञ्चयतीत्यर्थः।

[२४.११] लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने॥ (७.३.३९)

सूत्रार्थः– लीयतेः लातेश्च क्रमात् नुग्लुकौ आगमौ वा स्तः णौ स्नेहद्रवे।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् चत्वारि पदानि सन्ति। लीलोः (६/२), नुग्लुकौ (१/२), अन्यतरस्याम् (सप्तमीविभक्तिप्रतिरूपमकमव्ययम्), स्नेहनिपातने (७/१) इति सूत्रगतपदच्छेदः। ली च लाश्च इति इतरेतरयोगद्वन्द्वे लीलौ, तयोः लीलोः। स्नेहस्य निपातनम् स्नेहनिपातनम् इति षष्ठीतत्पुरुषः। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगात् णौ इत्यस्यानुवृत्तिर्भवति , अङ्गस्य (६.४.१) इत्यधिक्रियते। एवञ्च सूत्रार्थस्तावत् – स्नेहद्रवे ली इत्यङ्गस्य, ला इत्यङ्गस्य च यथासङ्ख्यं नुगागमः लुगागमश्च भवति णिचि परतः। नुक् लुक् इत्युभयत्रापि ककारौ इत्संज्ञकौ, उकारौ उच्चारणार्थकौ। अतः क्रमशः न् ल् इत्येव शिष्यते। तथा च सूत्रेणानेन नुग्लुकौ आगमौ विधीयेते।

उदाहरणम् – विलीनयति, विलाययति। विलालयति, विलापयति वा घृतम् इत्यत्र वि – उपसर्गपूर्वकलीधातोः विभाषा लीयतेः (६.१.५१) इत्यनेन विकल्पेन आत्त्वं भवति इति अस्मिन् पक्षे – विपूर्वकात् लीधातोः हेतुमति च (३.१.२६) इति योगेन णिचि आत्त्वे लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने (७.३.३९) इति योगेन लुकि विलालि इति जाते तिपि शपि गुणे एकारे अयादेशे विलालयति - विलालयते इति रूपं भवति, आत्त्वाभावपक्षे तु नुगागमे विलीनयति - विलीनयते इति रूपं सिध्यति।

स्नेहनिपातनार्थभिन्नार्थे तु न नुग्लुकौ भवतः किन्तु पुगागमः। एवञ्च विभाषा लीयतेः (६.१.५१) इत्यनेन आत्त्वविकल्पे अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुकि वि-लापि इत्यस्य धातुसंज्ञायां विलापयति -विलापयते इति रूपं सिध्यति। किञ्च आत्त्वाभावपक्षे णिचि परे ली इत्यस्य ईकारस्य अचो ञ्णिति (७.२.११५) इत्यनेन वृद्धौ ऐकारादेशे आयादेशे वि-लायि इत्यस्य धातुसंज्ञायां विलाययति -विलाययते इति रूपं सिध्यति।

पाठगतप्रश्नाः ३

१४.श्यन्तं प्रेरयति इत्यर्थे किं रूपं भवति।

१५.लियः सम्माननशालीनकरणयोश्च इति सूत्रेण किं विधीयते।

१६.बालमुल्लापयते इत्यस्य कोऽर्थः।

१७.श्येनो वर्तिकामुल्लापयते इत्यस्य कोऽर्थः।

१८.लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने इति शास्त्रव्याख्यानावसरे साकल्येन कति रूपाणि प्रदर्शितानि सन्ति।

१९.वाजयति इत्यत्र मूलधातुः कः, णिजन्तधातुश्च कः।

ण्यन्तधातुभ्यः कर्त्रभिप्रायक्रियाफले णिचश्च (१.३.७४) इत्यनेन आत्मनेपदे सिद्धे अकर्त्रभिप्राये क्रियाफलेऽपि आत्मनेपदं भवति न तु परस्मैपदमिति नियमार्थमिदं सूत्रमारभ्यते–

[२४.१२] भीस्म्योर्हेतुभये (१.३.६८)

सूत्रार्थः – प्रयोजकात् यदि भयस्मयौ गम्येते तर्हि ण्यन्ताभ्यां भीस्मिधातुभ्याम् आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकम्। भीस्म्योः (६/२), हेतुभये (७/१) इति सूत्रगतपदच्छेदः। भीश्च स्मिश्च भीस्मी, तयोः भीस्म्योः। हेतोः भयम् इति पञ्चमीतत्पुरुषे हेतुभयम्, तस्मिन् हेतुभये। अनुदात्तङित आत्मनेपदम् (१.३.१२) इत्यस्मात् आत्मनेपदमनुवर्तते, किञ्च णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने (१.३.६७) इत्यतः णेः इत्यस्यानुवृत्तिर्भवति। एवञ्च पूर्वोक्तसूत्रार्थः फलति। सूत्रे भयग्रहणम् धात्वर्थस्योपलक्षणार्थम्। तेन भयशब्देन स्मयार्थस्यापि ग्रहणं भवति। तथा च सूत्रेणानेन आत्मनेपदं विधीयते।

उदाहरणम् – मुण्डो भापयते।

सूत्रार्थसमन्वयः – बिभ्यन्तं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इत्यनेन भीधातोः णिचि भी इ इति स्थिते बिभेतेर्हेतुभये (६.१.५६) इति योगेन धातोः ईकारस्य स्थाने विकल्पेन आकारादेशे भा इ इति जाते अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुगागमे भापि इति जाते कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्तं किञ्च अकर्त्रभिप्राये क्रियाफले परस्मैपदं प्राप्तमिति उभयत्रापि आत्मनेपदं विहितं भीस्म्योर्हेतुभये (१.३.६८) इति योगेन। एवञ्च भापि इत्यस्मात् लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि गुणे अयादेशे **भापयते** इति रूपं भवति। यदा तु बिभेतेर्हेतुभये (६.१.५६) इत्यनेन आकारादेशो न भवति तस्मिन्पक्षे अग्रिमसूत्रमारभ्यते–

[२४.१३] भियो हेतुभये षुक्॥ (७.३.४०)

सूत्रार्थः – ईकारान्तस्य भियः षुक् आगमः स्यात् णौ हेतुभये।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकम्। भियः (६/१), हेतुभये (७/१) षुक् (१/१) इति सूत्रगतपदच्छेदः। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इत्यतः णौ इत्यनुवर्तते। भी ई इति ईकारः प्रश्लिष्यते। एवञ्च ईकारान्तावस्थायां स्थितस्य भीधातोः षुगागमो भवति णिच्प्रत्यये परे। सूत्रमिदम् अचो ञ्णिति (७.२.११५) इति सूत्रस्य बाधकमस्ति। सूत्रमिदम् भीधातोः आत्तावस्थायां न प्रवर्तते। तथा च सूत्रेणानेन षुगागमो विधीयते।

उदाहरणम् – भीषयते।

सूत्रार्थसमन्वयः – एवञ्च हेतुभयार्थे गम्यमाने भीधातोः हेतुमण्णिचि भी इ इति जाते प्राप्तवृद्धिं बाधित्वा भियो हेतुभये षुक् इत्यनेन षुकि भीषि इति जायते। ततः भीस्म्योर्हेतुभये (१.३.६८) इत्यनेन कर्त्रभिप्रायाकर्त्रभिप्रायक्रियाफले आत्मनेपदं भवति, तेन भीषि इत्यस्मात् आत्मनेपदप्रत्यये प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये शपि गुणे एकारे अयादेशे टित आत्मनेपदानां टेरे (३.४.७९) इत्यनेन टेः एत्वे भीषयते इति रूपं भवति। यदि च प्रयोजकात् भयं न प्रतीयते तदा न आत्मनेपदं, न

आत्त्वम्, न वा षुगागमः, आत्त्वाभावे पुगपि न भवति। तेन भी इ इति स्थिते तिपि शपि वृद्धौ आयादेशे भाययति कुञ्चिकया इति सिध्यति इत्येवंक्रमेण रूपत्रयं सिध्यति।

[२४.१४] नित्यं स्मयतेः॥ (६.१.५७)

सूत्रार्थः – स्मयतेः एचः नित्यम् आत्त्वं स्यात् णौ हेतोः स्मये।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। नित्यम् (१/१) स्मयतेः (६/१) इति सूत्रगतपदच्छेदः। आदेच उपदेशेऽशिति (६.१.४५) इत्यतः आत् एच् इत्यनयोः अनुवृत्तिर्भवति। चिस्फुरोर्णौ (६.१.५४) इत्यतः णौ इत्यस्य तथा बिभेतेर्हेतुभये (६.१.५६) इत्यतः हेतुभये इत्यस्य चानुवृत्तिर्भवति। स च हेतुभयशब्दः हेतुस्मयार्थस्यापि उपलक्षणमस्ति। तदनुसारं नित्यं स्मयतेः (६.१.५७) इत्यत्र स्मिधातोः सत्त्वात् हेतुभये इति शब्दस्य हेतुस्मये इत्यर्थो भवति। यतो हि स्मिधातोः भयार्थो भवितुं नार्हति। एवञ्च स्मिधातोः एचः स्थाने नित्यम् आकारादेशो भवति णिच्प्रत्यये परतः। विभाषा लीयतेः (६.१.५१) इत्यतः विभाषापदस्यानुवृत्तिः मास्तु इत्येतदर्थं सूत्रेऽस्मिन् नित्यम् इति पदमुपात्तम्। बिभेतेर्हेतुभये (६.१.५६) नित्यं स्मयतेः (६.१.५७) इति सूत्रद्वयाभ्यां विधीयमानमात्त्वं, भीस्म्योर्हेतुभये (१.३.६८) इत्यनेन विधीयमानमात्मनेपदं च प्रयोजकात् यदि भयं गम्यते तदैव भवति इति स्मर्तव्यम्।

उदाहरणम्– जटिलो **विस्मायते** । विस्मयमानं प्रेरयति इत्यर्थे विपूर्वकात् स्मिङ् ईषद्धसने इति धातोः णिचि वि स्मि इ इति जाते धातोः इकारस्य अचो ञ्णिति (७.२.११५) इत्यनेन वृद्धौ ऐकारे आयादेशे नित्यं स्मयतेः (६.१.५७) इत्यनेन नित्यम् आकारादेशे वि स्मा इ इति जायते। ततः आकारान्तत्वात् अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ इत्यनेन पुगागमे वि स्मापि इति जाते भीस्म्योर्हेतुभये (१.३.६८) इत्यनेन नित्यम् आत्मनेपदे प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये शपि गुणे एकारे विस्मापयते इति रूपं सिध्यति। यदि च हेतोः (प्रयोजकात्) भयं न गम्यते तर्हि नैव नित्यम् आत्मनेपदात्त्वं भवति, आत्त्वाभावे च न पुगागमः तेन स्माययति, स्माययते कुञ्चिकया एनम् इति प्रयोगो भवति।

षिधु संराद्धौ इति दिवादिगणीयधातोः सिध्यन्तं प्रेरयतीत्यर्थे णिचि सिध् इ इति स्थिते उपधागुणे सेध् इ इति जाते अग्रिमसूत्रमारभ्यते–

[२४.१५] सिध्यतेरपारलौकिके॥ (६.१.४९)

सूत्रार्थः – ऐहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरेच आत्त्वं स्याण्णौ।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकस्ति। सिध्यतेः (६/१), अपारलौकिके (७/१) इति सूत्रगतपदच्छेदः। आदेच उपदेशेऽशिति (६.१.४५) इत्यतः आत् एचः इत्यनयोः, क्रीङ्जीनां णौ

इत्यतश्च णौ इत्यस्यानुवृत्तिर्भवति। एवञ्च परलोकासम्बन्ध्यर्थे अर्थात् इहलोकार्थे विद्यमाने सिध्-धातोः एचः स्थाने आकारादेशो भवति णिचि परे इति सूत्रार्थः। सूत्रेणानेन आत्त्वं विधीयते।

उदाहरणम् - अन्नं **साधयति**, निष्पादयीत्यर्थः।

सूत्रार्थसमन्वयः - तथा च सेध् इ इत्यत्र उपधाभूतस्य एकारस्य स्थाने आकारादेशो भवति अपारलौकिकार्थस्य गम्यमानत्वात् सिध्यतेरपारलौकिके (६.१.४९) इत्यनेन। तथा च साधि इत्यस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचविवक्षायां तप्रत्यये शपि गुणे एकारे अयादेशे साधयते, तिपि तु साधयति इति रूपं सिध्यति।

यदि च पारलौकिकार्थस्य प्रतीतिर्भवति तदा नास्य सूत्रस्य प्रवृत्तिर्भवति तेन सेधयते इत्येव रूपम्। तथा च प्रयोगः- तापसः सिध्यति तत्त्वं निश्चिनोति। तं प्रेरयति सेधयति तापसं तपः।

दुष वैकृत्ये इति दिवादिगणीयधातोः दुष्यन्तं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इत्यनेन णिचि दुष् इ इति जाते पुगन्तलघूपधस्य च (७.३.८६) इत्यनेन लघूपधागुणे प्राप्ते सूत्रमिदमारभ्यते-

[२४.१६] दोषो णौ (६.४.९०)।

सूत्रार्थः - दुष्धातोः उपधायाः स्थाने ऊत् इत्यादेशो णिच्प्रत्यये परतः।

सूत्रव्याख्या -विधिसूत्रमिदं पदद्वयात्मकमस्ति। दोषः (६/१), णौ (७/१) इति सूत्रगतपदच्छेदः। दोषः दुष्धातोः लघूपधगुणनिर्देशः। ऊदुपधाया गोहः (६.४.८९) इत्यतः ऊत् , उपधायाः इत्यनयोरनुवृत्तिर्भवति। एवञ्च सूत्रार्थः सिध्यति। सूत्रेणानेन ऊदादेशो विधीयते।

उदाहरणम् - दूषयते, दूषयति।

सूत्रार्थसमन्वयः - तथा च दुष्धातोः णिचि लघूपधगुणे प्राप्ते तं बाधित्वा दोषो णौ इत्यनेन उपधाभूतह्रस्व-उकारस्य स्थाने दीर्घ-ऊकारे दूषि जाते ततः तिपि शपि गुणे एकारे अयादेशे दूषयति , तप्रत्यये तु दूषयते इति रूपम् इत्याहत्य रूपद्वयं सिध्यति।

चित्तविरागार्थे तु विकल्पेन अयम् ऊदादेशो भवति। तेन चित्तं दूषयति, दोषयति वा कामः इत्यत्र तु चित्तविरागार्थोऽस्ति इति हेतोः वा चित्तविरागे (६.४.९१) इत्यनेन विकल्पेन दुष्धातोः उपधायाः स्थाने उकास्य ऊत् इति दीर्घादेशे दूषयति इति रूपं सिध्यति, यदा तु न ऊदादेशः तदा दुष्धातोः णिचि दुष् इ इति जाते गुणे ओकारे तिपि शपि गुणे अयादेशे दोषयति इति रूपं भवति इति साकल्येन रूपद्वयं सिध्यति।

अदादिगणीयात् इण् गतौ इति धातोः अयन्तं प्रेरयति इत्यर्थे णिचि इ इ इति जाते सूत्रमिदमारभ्यते -

[२४.१७] णौ गमिरबोधने॥ (२.४.४६)।

सूत्रार्थः – अबोधनार्थे गम्यमाने इण्धातोः स्थाने गमि इत्यादेशो भवति णिचि परे।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। णौ (७/१), गमिः (१/१), अबोधने (७/१) इति सूत्रगतपदच्छेदः। न बोधनम् इति नञ्तत्पुरुषे अबोधनम् , तस्मिन् अबोधने। इणो गा लुङि (२.४.४५) इत्यतः इणः इति पदमनुवर्तते। तेन सूत्रार्थः सिध्यत्येव। गमेः इकार उच्चारणार्थः, गम्मात्रं शिष्यते। बोधनार्थे अयमादेशो न भवति इति धेयम्। तथा च सूत्रेणानेन गमि इत्यादेशो विधीयते।

उदाहरणम् – गमयति।

सूत्रार्थसमन्वयः – तथा च इण्धातोः णिचि णौ गमिरबोधने इत्यनेन गमि इत्यादेशे अनुबन्धलोपे च गम् इ इति जायते। ततः अत उपधायाः (७.२.११६) इत्यनेन उपधाभूतस्य अकारस्य वृद्धौ जनीजृष्क्नसुरञ्जोऽमन्ताश्च इति गणसूत्रेण मित्संज्ञायां मिद्वद्भावे वा मितां ह्रस्वः (६.४.९२) इत्यनेन उपधाभूतस्य आकारस्य ह्रस्वे गमि इत्यस्यैव सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां तिपि शपि गुणे एकारे अयादेशे गमयति इति रूपं सिध्यति, पक्षे गमयते इत्यपि भवति।
बोधनार्थे तु नायमादेशः तेन प्रत्याययति इत्येव रूपम्, पक्षे प्रत्याययते इत्यपि भवति।

नित्यमधिपूर्वकात् इङ् अध्ययने इति अदादिगणीयधातोः अधीयमानं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इति णिचि अधि इ इ इति स्थिते अग्रिमसूत्रमिदमारभ्यते–

[२४.१८] क्रीङ्जीनां णौ (६.१.४८)।

सूत्रार्थः – क्री–इङ्–जिधातुभ्यः एचः स्थाने आकारादेशो भवति णिचि परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। क्रीङ्जीनाम् (६/३) , णौ (७/१) इति सूत्रगतपदच्छेदः। क्रीश्च इङ् च जिश्च तेषामितरेतरयोगद्वन्द्वे क्रीङ्जयः तेषां क्रीङ्जीनाम्। आदेच उपदेशेऽशिति (६.१.४५) इत्यस्मात् आत्, एचः इति पदद्वयस्यानुवृत्तिर्भवति। एवं सूत्रार्थः सिध्यति।

उदहरणम् – अध्यापयति।

सूत्रव्याख्या – एवञ्च अधिपूर्वकात् इङ्धातोः णिचि अधि इ इ इति स्थिते धातोः इकारस्य क्रीङ्जीनां णौ इत्यनेन आत्त्वे अधि आ इ इति जाते अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुगागमे अनुबन्धलोपे अधि आपि इति जाते ततः यणि अध्यापि इति समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि गुणे एकारे तस्य च अयादेशे अध्यापयति इति रूपं सिध्यति, पक्षे अध्यापयते इत्यपि भवति।

एवमेव क्रीणन्तं क्रयमाणं वा प्रेरयति इत्यर्थे डुक्रीञ् द्रव्यविनिमये इति धातोः णिचि आत्त्वे पुगागमे तिपि शपि गुणे एकारे अयादेशे क्रापयति इति रूपं सिध्यति, पक्षे क्रापयते इत्यपि भवति। जि जये धातोः जयन्तं प्रेरयति इत्यर्थे णिचि आत्त्वे पुगागमे तिपि शपि गुणे एकारे अयादेशे जापयति इति रूपं सिध्यति, पक्षे जापयते इत्यपि भवति।

बोधसौकर्याय अत्र कानिचित् णिजन्तरूपाणि लटि लुङि च अधः तालिकया प्रदर्श्यन्ते –

धातुः	ण्यन्तार्थः	सामान्यरूपाणि	णि.लटि रूपाणि	णि.लुङि.रूपाणि
अद्	खिलाना	अत्ति	आदयति	आदिदत्
कृ	कराना	करोति	कारयति	अचीकरत्
क्री	खरीदवाना	क्रीणाति	क्रापयति	अचिक्रपत्
क्रीड्	खेलाना	क्रीडति	क्रीडयति	अचिक्रीडत्
खाद्	खिलाना	खादति	खादयति	अचीखदत्
गम्	भिजवाना	गच्छति	गमयति	अजीगमत्
ग्रह्	ग्रहण करवाना	गृह्णाति	ग्राहयति	अजिग्रहत्
चल्	चलाना	चलति	चालयति	अचीचलत्
जन्	पैदा करना	जायते	जनयति	अजीजनत्
जीव्	जिलाना	जीवति	जीवयति	अजिजीवत्
ज्ञा	बोध करना	जानाति	ज्ञापयति	अजिज्ञपत्
तुष्	प्रसन्न करना	तुष्यति	तोषयति	अतूतुषत्
त्यज्	छुडाना	त्यजति	त्याजयति	अतित्यजत्
दा	दिलवाना	ददाति	दापयति	अदीदपत्
दृश्	दिखाना	पश्यति	दर्शयति	अदीदृशत्
नम्	झुकाना	नमति	नामयति	अनीनमत्
नश्	नष्ट कराना	नश्यति	नाशयति	अनीनशत्
पच्	पकवाना	पचति	पाचयति	अपीपचत्
पठ्	पढाना	पठति	पाठयति	अपीपठत्
पा	पिलाना	पिबति	पाययति	अपीपबत्
पुष्	पुष्ट करना	पुष्यति	पोषयति	अपूपुषत्
बोध्	बोध कराना	बुध्यति	बोधयति	अबूबुधत्
मिल्	मिलाना	मिलति	मेलयति	अमीमिलत्
मुद्	प्रसन्न करना	मोदते	मोदयति	अमूमुदत्

यज्	यज्ञ करवाना	यजति	याजयति	अयीयजत्
युज्	मिलवाना	युनक्ति	योजयति	अयूयुजत्
रुद्	रुलाना	रोदिति	रोदयति	अरूरुदत्
लभ्	प्राप्त कराना	लभते	लम्भयति	अललम्भत्
लिख्	लिखाना	लिखति	लेखयति	अलीलिखत्
वच्	कहलवाना	वक्ति	वाचयति	अवीवचत्
वस्	वास कराना	वसति	वासयति	अवीवसत्
वृध्	बढाना	वर्धते	वर्धयति	अवीवृधत्
शी	सुलाना	शेते	शाययति	अशीशयत्
श्रु	सुनाना	श्रृणोति	श्रावयति	अशुश्रवत्
स्मृ	स्मरण करना	स्मरति	स्मारयति	असस्मरत्
हन्	मरवाना	हन्ति	घातयति	अजीघतत्
हस्	हसाना	हसति	हासयति	अजीहसत्

पाठगतप्रश्नाः-४

२०.भापयते इत्यत्र आत्त्वं कुतः।

२१.सिध्यतेरपारलौकिके इत्यस्य उदाहरणं किम्।

२२.दुष्यन्तं प्रेरयति इत्यर्थे णिचि किं रूपम्।

२३.इण् गतौ धातोः अबोधनार्थे बोधनार्थे च णिचि किं रूपम्।

२४.अधीयमानं प्रेरयति इत्यर्थे किं रूपं भवति।

२५.क्रापयति इत्यस्य कोऽर्थः इति लिखत।

२६.नित्यं स्मयतेः (६.१.५७) इत्यस्य किम् उदाहरणम्।

२७.विस्माययति कुञ्चिकया एनम् इत्यादौ कुतो न नित्यम् आत्त्वम्।

पाठसारः

समासेन अस्य पाठस्य मुख्यविषयः अत्र उपन्यस्यते। भ्वादितः चुरादिं यावत् ये धातवः वर्तन्ते तेषां भूवादयो धातवः (१.३.१) इत्यनेन धातुसंज्ञा भवति। ते धातवः दशसु गणेषु विभक्ताः सन्ति इति हेतोः ते दशगणीया धातवः इत्युच्यन्ते। तेभ्य एव धातुभ्यो प्रेरणार्थे णिच्प्रत्यये कृते सति तेषां नूतनानां शब्दानां धातुसंज्ञा सनाद्यन्ता धातव (३.१.३२)इत्यनेन भवति इति पार्थक्यं सम्यक् अवधेयम्। अपरञ्च णिच्प्रत्ययः स्वार्थ–प्रेरणार्थभेदेन द्विविधोऽस्ति। अत्र तु स्वार्थकणिच् नैव चर्चाविषयः, अपि तु प्रेरणार्थक एव इत्यपि सम्यक् ज्ञेयम्। किञ्च णिच्प्रत्ययः नित्य एव भवति इत्येवं नियमो नास्ति। अतः पक्षे वाक्यमपि साधु भवति। तस्मात् पठ्धातोः णिच्प्रत्यये यथा पाठयति इति पदं साधु तथैव पठितुं प्रेरयति इति वाक्यमपि साधु। अस्मिन् पाठे आदौ णिच्प्रत्ययान्तरूपं कथं निष्पद्यते इति ससूत्रं प्रदर्श्य णिजन्तधातोः लुङि विशेषाय ओः पुयण्ज्यपरे इति योगो व्याख्यातः। ततः पुक्–युक्–जुक्–आगमविधायकसूत्राणि सोदाहरणं व्याख्यातानि। ततः णिच्परे सति कदाचित् धातोः उपाधायाः दीर्घो भवति, कदाचिद्वा उपधायाः ह्रस्वो भवति, कदाचिच्च उपधाया ऊत्त्वं भवति इत्यादिविषयाः तत्तत्सूत्राणाम् तत्तदुदाहरणेषु प्रदर्शिताः सन्ति। ततः ली–लाधात्वोः विषये , भी–स्मिधात्वोः विषये च दीर्घचर्चा विहिता। ततः साधयति, दूषयति, अध्यापयति, वाजयति, गमयति इत्येतेषां अस्मद्व्यवहृतशब्दानां प्रक्रिया अपि तत्तत्सूत्रेषु प्रदर्शिताः सन्ति।

पाठान्तप्रश्नाः

१. भावयति इति रूपं साधयत।

२. तनोर्यकि इति सूत्रं सोदाहरणं व्याख्यात।

३. ओः पुयण्ज्यपरे इति योगो व्याख्येयः।

४. णौ च संश्चङोः इति शास्त्रं व्याख्यात।

५. क्रीङ्जीनां णौ इति न्यासस्य उदाहरणानां प्रक्रियाः प्रदर्शनीयाः।

६. गमयति इति रूपं ससूत्रं व्याख्यात।

७. भीधातुरूपविषये टिप्पणी लेखनीया।

८. सिध्यति इति रूपं साधयत।

९. दोषो णौ इति सूत्रस्थोदाहरणानि विशदीकरणीयानि।

१०. पाठप्रदर्शितलीलाधातुरूपविषये टिप्पणी लेखनीया।

११. स्तम्भयोः स्थितान् परस्परसम्बद्धान् मेलयत।

	क-स्तम्भः		ख-स्तम्भः

१	तत्प्रयोजको हेतुश्च	a	उपधाह्रस्वः
२	क्रीङ्जीनां णौ	b	तायते
३	प्रत्याययति	c	बोधयति
४	भीस्म्योर्हेतुभये	d	उभयपदविधानम्
५	शाच्छासाह्वाव्यावेपां युक्	e	शाययति
६	शालीनीकरणम्	f	उपधावृद्धिनिषेधः
७	नोदात्तोपदेशस्य मान्तस्यानाचामेः	g	अभिभवः
८	तनोर्यकि	h	आत्मनेपदम्
९	मितां ह्रस्वः	i	अध्यापयति
१०	णिचश्च	j	कर्तृसंज्ञा

पाठगतप्रश्नानामुत्तराणि

उत्तराणि–१

१. आम्, भवति।

२. कर्तुः प्रयोजकस्य।

३. प्रेरणार्थे।

४. आम्, भवति।

५. प्रयोजककर्तुः व्यापारः।

६. परस्मैपदात्मनेपदविधानं भवति।

७. सनि परे यदङ्गं तदवयवाभ्यासस्योकारस्य इत् स्यात् पवर्ग–यण्–जकारेषु अवर्णपरेषु परतः।

८. अबीभवत्।

उत्तराणि–२

९. चङ्परके णौ परे सति स्थाधातोः उपधायाः इकारादेशो भवति।

१०. पुगागमः।

११. मितां ह्रस्वः।

१२. घटादीनां ज्ञपादीनां चोपधायाः ह्रस्वः स्याण्णौ।

१३. ज्ञप मिच्च इति निर्देशात्।

उत्तराणि–३

१४. शाययति, शाययते।

१५. आत्मनेपदम्।

१६. बालं वञ्चयति।

१७. श्येनः वर्तिकाम् अभिभवति।

१८. अष्टौ।

१९. ओ वै शोषणे इति मूलधातुः, वाजि इति णिजन्तधातुः।

उत्तराणि–४

२०. बिभेतेर्हेतुभये (६.१.५६)।

२१. अन्नं साधयति, निष्पादयतीत्यर्थः।

२२. दूषयति, दोषयति।

२३. अबोधनार्थे-गमयति। बोधनार्थे तु प्रत्याययति।

२४. अध्यापयति।

२५. क्रीणन्तं क्रयमाणं वा प्रेरयति।

२६. जटिलो विस्मायते ।

२७. हेतोः भयं न गम्यते इति कारणात्।

स्तम्भप्रश्नानाम् सूचकोत्तराणि –

१०.१-j, २-i, ३-c, ४-h, ५-e, ६-g, ७-f, ८-b, ९-a, १०-d

॥इति चतुर्विंशः पाठः ॥